CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P. 13

Coll. No. 451

Title Vaidhya Bhasya.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 451 Subject: ~~Puranic lit~~ Vedānta.

Title: Vaitathya Bhāṣya

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 6.4" by 4.2" Extent: 111-209 foll.

Language: Sanskrit Script: Devanagari

Remarks:

साभिप्रायतयापरिकरांकुरः। तदुक्तं। चंद्रालोके। साभिप्रायंविशेष्यंचेद्भवे
परिकरांकुरइति। विज्ञानदानरूपस्यार्थस्याविद्यावृत्तिग्रहरणहेतुत्वात्का
व्यलिंगइतिसंसृष्टिः। तन्महत्त्वमेवेत्युदात्तं। हेत्वलंकारोवेतिसंदेहालंका
रः। तदुक्तं। हेतुहेतुमतोरैक्यंहेतुकेचित्प्रचक्षतइति॥११॥ तदेवंस्वतंत्र
स्वक्रमविधिंनिरूप्यपरैर्वेयंषडंग।शक्तिभिर्व्याप्तेतिसूत्रयन्नसाधार
णीषडंगवासनामाह॥ सर्वज्ञोनित्यसन्तृप्तःसत्सद्गुणमयगोनादिबोधःस्वतं
त्रोनित्यालुप्तात्मशक्तिर्निरुपमचरितोनंतदृक्संगषट्के॥ षड्ंगशक्तिव्यक्त
भावस्त्वमिहपरिच्छिन्नवज्ञायसेदेहिकोक्यायेनस्वात्ममन्नादेसकलवि

न्यमितं तेपरं याः सन्निदं॥२४॥हे शिवेति।शिवमुक्तिरूपश्रेयस्करा चेत् त्वं महा
त्मन्नशरीरेऽङ्गषट्केति।अङ्गानां हृदयादीनां षट्कं हृदयशिरःशिखाकवचने
त्रास्त्ररूपे।कर्मपुराणे ईश्वरगीतासु।सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता
नित्यमलुप्तशक्तिः अनन्तशक्तिश्च विभोर्विधिज्ञाः षडङ्गमाहुर्महेश्वर
स्येति।सर्वज्ञ इति।सर्वं जानाति सर्वज्ञः।अत्रैतरेयश्रुतिः।ईशानः सर्ववि ११
द्यानामिति।श्रुत्यंतरं च।यस्य ज्ञानमयं तप इति।अत एव नित्यतृप्तः पूर्ण इ
त्यर्थः।तथा च वाजसनेयिकश्रुतिः।तदात्मकाममाप्तकाममकामरूप
मिति।सदसदुभयग इति।सदमृतममृतं सुः सत्यसतीत्यनेन गच्छतीति तथो

क्तः।तथा च योगवासिष्ठे।यत्र सदसतोर्मध्ये पदं बुद्ध्वावलंब्य इति।कोटिद्वयां
तरालस्थमिति च।अनादिबोध इति।अत एवानादिरकृत्रिमो बोधो स्वानुभवप
स्तयोक्तः।तथा च वाजसनेयिश्रुतिः।अदृष्टो द्रष्टा अश्रुतः श्रोता मतो
मंता विज्ञातो विज्ञाता नान्योऽस्ति मंता नान्योऽस्ति विज्ञातेति।अत एव स्वतंत्र इति
स्वतंत्रोऽपारतन्त्र्यः स्वैरीति कोशः।स्वच्छंद इत्यर्थः।तथा च वाजसनेयिश्रुतिः॥
असंगो ह्ययं पुरुषेति।अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छा
यमतमोऽवाय्वनाकाशमसंगमित्यादिरपि।स्मृतिश्च स्वतंत्रः पुरुषो ह्यजर
ति।नित्यालुप्तशक्तिरिति।नित्या विनाशिनाशिनी।तदुक्तं श्रीमदाचार्यैः।

निःसीमनिःसमारे निरवधिगुणे नीतिनिपुणोदसारिद्रसतरएव स्वरूपादीनाम-
प्यस्मात्स्वपटलात्रुत्रानामदर्शनरूपी योपसंनवाद्यानिरूपयवागतचक्षु
षांपामरादीनामपिप्रतीतिविषयत्वादनुल्लुप्तानाकलितादृग्चाकारे रस-
र्यः। तथा च कौषीतकिश्रुतिः। प्रतर्दनं दैवोदासिं प्रतीन्द्रस्योक्तिः। योमां वि
ज्ञानीयात्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्यतीन्सालावृकेभ्यः प्रायच्छं ११२
बह्वीः संधा अतिक्रम्य दिवि प्रह्लादीयानतृणमहमंतरिक्षे पौलोमान
पृथिव्यां कालखंजांस्तस्य मे लोम च नामीयत स यो मां वेद न ह वै तस्य केन च
कर्मणा लोको मीयत इति। इदि परमैश्वर्ये इति। धातोरूपं णादिसिद्धइंद्रः

परमैश्वर्यानुपपौरन्त्रिवएव। मंत्रांतरमपि। संक्रंदनो निमिषएकवीरः। शतं
सेना अजयत्साकमिंद्र इति। प्रतिलवं सचित्रैः प्रतीयमाने सर्वः आत्मनःप्र
कात्रास्य निरुक्तलक्षणस्य। शक्तिः स्फुरत्तालक्षणविमर्शाख्या यस्य तयोक्तः।
तदुक्तं कूर्मपुराणे। ममैव परमा शक्तिर्यासा विद्येति कीर्त्यते। शोषयामित
या मायां योगिनां हृदि संस्थित इति। कामकलाविलासेपि। स्वाभाविकस्वरू
पाविमर्शवपुरस्य विद्यतेपराशक्तिरिति। अथवात्मनः शाक्तयः। तदुक्तं
कूर्मपुराणे। अहं हि सर्वशक्तीनां प्रवर्तकनिवर्तकः। आधारभूतः सर्वासां
निधानममृतस्य च। एका सर्वांतरा शक्तिः करोति विविधं जगत्। आस्था

प ब्रह्मणो रूपं मन्मयीमरधिष्ठिता। अमा च शक्तिर्विपुलां संस्थाप्य पयति मे जग
त्। भूत्वा नारायणो नंतो जगन्नाथो जगन्मयः। तृतीया महती शक्तिर्निहंति स
कलं जगत्। तासमीपे समाख्याताः कालाख्या रुद्ररूपिणीति। इदं वाक्यं पूर्वं नि
रूनिर्दैरूपितकालसंकर्षिण्या अप्यनिरुक्तं। निरूप चरितोनंत इति। यत
एवं विधोतो निरूपममुपमानस्य। रूपस्यापरस्याभावात् उपमारहितं चरि ११३
तं यस्य वस्तुतिस्तत्तच्छक्त्युपरक्तस्यापि वीतोपरागावस्थितिर्यस्य तथोक्तो।
त एवानंतोपरिच्छिन्नः। तथा च कठवल्लीश्रुतिः। रूपंरूपं प्रतिरूपो बभू
व तदस्य रूपं प्रतिचक्षणाय। वाजसनेयिश्रुतिरपि। इंद्रो मायाभिः पुरुरू

पईयते इति। वा अरद्दृंमहद्भूतमनंतमपारमिति श्रुतेः इति षष्ट्शक्तिमत्त्वा
वइति। इति प्रकारेण समर्थः। षड्भिः सर्वज्ञतानित्यतृप्ततानादिबोधता स्वतंत्र
तानित्यमलुप्तानंतताख्याभिः शक्तिभिर्युक्तः। अंतर्न्यविततएषोकर्मणोक्तः
वंजितइस्पर्धः। भावः सत्त्वायमस्त तथोक्तः। यथा पूरेणकार्येणकारणभूतायो
उपरिवृष्टेरनुमितिः। तदुक्तं सत्कविभिः। वृष्टो नदीमुखेनैव प्रस्थानं तव
णा मस इति। त्वं हे शिकोक्षेति। देशिकरश्मिप्रकंपनेइति धातोर्युसन्नः
प्रकृष्टकंपनं तु। निःप्रपंचं निरीक्षेत तद्दृशा दृत्ते न चिरं बुधः। सुधार्द्रया वि
शुद्धस्फुलीयेनानंदचिद्घन इति। सा निखिलपापाशपाटनसमर्था निरीक्ष

त्सर्वं शिष्यात्मनः परशिवाहं भावनोपदेशात्स्वरूपं निष्कलं शिवं बुधाः तद्रूपत्वं गुरो
रपि। तन्निरीक्षणसामर्थ्याद्रात्मनश्च शिवात्मतां। भावयेच्छक्तिनम्रः सन् तत्रांकोन्ये
षाकलंकिनोदुसुतरचतुःश्चातीरीसादृश्यात्तिप्रकंपयपति। दृशिकल्पस्य र
क्तशुक्लपद्मद्वंद्वं मस्तके यस्य राजते श्रांतं च तयोर्मध्ये तस्य श्रीपादुका
स्मृतिरिति गुरुपादुकास्तोत्ररीत्या दक्षिणामूर्त्तिमंत्राणां दर्शनादृषिः सचो ११५
भयोरपि विद्ययोः। यथा प्राकृता अपि त्वाद्या अनुष्टुपादिछंदोनिबद्धा दुरूहा
स्तथात्रापि मंत्रार्थगोपनाच्छंदः। तथा च कौथुमी श्रुतिः। दिवा वै मृत्योर्बिभ्य
तस्त्रयीविद्यां प्राविशंस्ते छंदोभिराच्छादयंस्त छंदसां छंदस्त्वमिति। वक्ष्यंते

चेरुप्यादि वासना क्रमयोर्मातृकास्कंधविवेके मासे विद्यादिनेत्रे सत्र। तच्चा
पंक्तिरूपयोः परदेवतात्मिके देवते पराकालसंकर्षिण्यो। तदुक्तं मदुक्त
ललितार्चासंग्रहे। स्वप्रकाशचिदंबोधिस्थेरलीलारसोज्ज्वलः। पदार्थमल
केनास्यानुत्तमं तामनोकृषिः। सर्वेषां मंत्रतत्त्वानां छादनाच्छंद आनने।
अकृत्रिममनाद्यं तं देवनं देवताहृदीति। ततो हृदयांबुजमध्ये परशिवं
चिदात्मकं विचिंत्य तत्र समनस्कं जीवनमद्य इति मंत्रेण समर्पयेत्। तदु
क्तं आगमकल्पद्रुमे। इडया मा हृदयं हृदयैस्थैच्छिदात्मकं। क्षिपते तत्स
रत्वेन हृदयेन ततः परमिति॥ ततः स्वाहेति मंत्रेण सकलं वेद्यरूपं हव्यं द्र

ञ्जियसुखामनोद्वाराद्दूरयमानीय तारादिपंचमनुपरिचीयमाने सर्वज्ञत्वादि-
गुणप्रक्षेपरसंविद्रूपोऽनुकुर्यात्। तदुक्तं तत्रैव। सर्वज्ञत्वादिगुणैर्युंगे संविद्रू-
पे परात्मनि। क्रियते विषमाहारः शिरोमंत्रेण दीक्षिकैरिति। ततो वषडिति मं-
त्रेण द्वीपाद्द्वीपांतरमिव तत्स्वसङ्केतमनुलोमक्रमेण क्रमागतेन बहिःस
र्वत्रमेयसंविद्घनत्वततया चिन्मयतां ध्यायेत् परामृषेव॥ तदुक्तं तत्रैव फ-
ट्शिरोरूपचिह्नं मम यत्ता वासनादृढा। क्रियते निजदेहस्य शिरोमंत्रेण दी-
क्षिकैरिति। ततो हुमिति मंत्रेण भूतशुद्ध्यादिशुद्धमात्मदेहं मंत्रमूर्तिं वि-
मृश्य मंत्रवाच्येन तेजसा। अथ ध्यानं रक्षणं। कोऽर्थः। शारीरे येपे नुपाधयो

हरेकर्त्तीयास्तम् हरीन्द्र सखात्म विमर्शोपयिकपदार्थगोपनं कवचार्थ इ-
त्यर्थः। तदुक्तं तत्रैव। मंत्रात्मकस्य देहस्य मंत्रवाच्येन तेजसा। सर्वतो वर्मं मं-
त्रेण क्रियते हमसंवृतिः॥ ततो वौषडिति मंत्रवाच्येन तेजसा मनसात्मनः प्र-
तिलोमक्रमेणैकं विभावयेत्॥ तदुक्तं तत्रैव॥ यदृष्ट्वाति परं ज्ञानं संविद्रूपे
परात्मनि। हृदयादिपरं तेजःस्याद्दृत नेत्रसंज्ञितमिति। ततः फडिति मू-
नेनैव विमर्शाख्येन तेजसा। स्वमाध्यात्मिकं जीवस्वरूपं। आधिभौतिकं सु-
खदुःखादि। आधिदैविकं धर्माधर्मरूपं तापत्रयं नाशयदस्त्रं। तदुक्तं तत्रै
व। आध्यात्मिकादि यद्रूपं साधकस्य विनाशयेत्। अविद्याजातमस्त्ररूपसंस्था

मद्वितीरितमिसा हिवासनागर्भयागुरोः। अस्याद्याहार्येणपश्चात्सर्वज्ञत्वाक्ति
धाम्नेहृदयायनमः। नित्यतृप्तत्वाक्तिधाम्नेशिरसेस्वाहा। अनादिबोध॰ शि
॰वषट्। स्वतंत्रत्वाक्तिधा॰क॰ नित्य॰ नेत्रत्रयायवौषट्। अनंतत्वाक्तिधा॰
फ॰ इतिरूपेणज्ञायसेऽस्माविषयःक्रियसेयेनेतितदितित्रो॰ तदीयेन
प्रमागोचरीकरणेन। अनादौनादिशक्तिनादौयस्मिंस्तथोक्तोनादस्तस्यस्तस्य स्व
स्मतरविभागविरुद्धैर्ध्वनादेरनवरतकव्याप्तिभिःसाधितैर्वैरिसादि ११६
नात्रैवबस्माणरीसामहाप्रसेस्वरूपएवविलयादनादित्वंपरत्रिवम
अत्रप्रमाणंपिंडावाचकविसरसमहतःसंस्कारदोषात्स्थितिनादौसोतव

सर्व्वेदेविसमनासीमानमुद्धेघयत्रघंटाफ्राणइवक्रमेणविरमन्नेसामणी
पत्नीमानिष्प्रत्रपरिचिद्दशामनुपमांसर्वत्रिपुराणीममेति। अनादावतीतइ
सादिपाशास्त्रपूर्वापरविवक्षितापर्यालोचनमूला। अनादेरितिपाठेपरा
याविशेषणं। तस्मात्त्वतेजोंतर्निरूढारचयतिजगतामादिमध्यांतकाला
नित्यत्वानादित्वसर्वव्यापित्वात्। तेस्वात्मनीति। एवंलक्षणेनत्वंसर्व
धिनिस्वात्मनिस्वस्वरूपेपराम्पाःषोडशपंचधाइत्याद्युक्तनिर्वचनामाः श्री
मच्छ्रीचक्रमहापुरस्याध्याःश्रीमहात्रिपुरसुंदर्याःसमेरमितिशेषः। परां
तीमध्यमावैखरीभिःइच्छाज्ञानक्रियाकुंडलीमातृकाभिः भारतीवसुधा

ष्टाणीभिः। आगुल्फषोडशपंचधा विंशन्मितैरिसर्पैः। वा सर्वत्रैतादृशीभिर्नि हु।
काभिः। षड्विंशगशक्तिभिरेव सन्नेहैः सह यथा तथेति क्रियाविशेषणं॥
सकलविलसितमिति सकलं कलाभिः अष्टत्रिंशद्भिः शिवस्य मंडलत्रय
स च प्रणवकलाभिश्चैकपंचाशद्भिर्मातृकास्कंधविवेचने विवक्षिता।
भिः सह विलसितं पुरत्रयसंचरणविहरणोल्लसितं। तदुक्तं पूर्वचतु २२७
शत्यां। प्रविश्य परमार्गे तु सूक्ष्माकारस्वरूपिणी कवलीकृतनिःशेषबीजा
ंकुरतां गता। वामा शिवा तथा ज्येष्ठा शृंगाकारतां गता। रौद्री तु परमेश्वानि।
जगज्ज्ञा सस्वरूपिणी। एवं सा परमा शक्तिरेकैव परमेश्वरि। त्रिपुरा त्रिविधा

देवि ब्रह्मविष्णवीशरूपिणी। ज्ञानशक्तिः क्रियाशक्तिरिच्छाशक्त्यात्मिकाप्रि
ये। त्रैलोक्यं संसृजत्यस्मात्त्रिपुरा परिकीर्त्तितेति। ज्ञातुर्नीतीति विशेषः। एतादृश
परमबोधवान् देशिकानुग्रहतः स्वस्वरूपमेव तथा प्रत्यपतीति यावत्। अ
लंकारस्त्वत्र पूर्वार्द्धे पूर्वपूर्वस्योत्तरोत्तरहेतुत्वात्कारणमाला। तथा च सर्वं
तत्र पूर्वपूर्वस्योत्तरहेतुत्वे कारणमालेति। देशिकोक्ता षड्शक्तिव्यक्तता
नैव इति पदार्थहेतुकगर्भस्य ज्ञानानंतवाक्यस्योत्तरवाक्यं प्रतिहेतुत्वाच्च
क्यार्थहेतुकं काव्यलिंगमपि॥ २२॥ ननु सोमापकारे पूर्वश्रुतौ गायत्री सा
वित्री सरस्वती स्वसजपा मातृका तया सर्वमिदं व्याप्तमिति उपक्रम्य गायत्री

मुहूर्त्ते प्रातर्गायत्री मध्यंदिने सावित्री सायं सरस्वतीति इतरमजपाहंसख्ये
वं भगवती सर्वमाप्नोतीत्येवं तस्यै नमो नम इति ॥ तान्भगवानाहे साद्रिनाग
पत्रे व विश्वात्मकतया तद्दुत्तीर्णतया च निरूपिता परा मन्त्रोद्धृतिरपि गाय
त्री तरवेति गायत्र्येवोपास्यत्वेनास्तु । अमस्तु । एकमेवाद्वितीयमिति रीत्या
चैकत्वं । मौनो । अक्षरविमर्शरूपो स्वात्मा विति द्विधात्वं । मातामानंमेयं बिंदु ११८
त्रयमिश्रबीजरूपाणि धामत्रयपीठत्रयशक्तित्रयमावतामपि चेति रे
वानां त्रितयं त्रयीकृतभुजामिमादिना च त्रिधात्वं । एवं च षोढा पंचधा चे
तिवासनाविवेचिता न चतुर्थरूपाण्येषमूर्तिचान्तुरीयाकापित्वमिति तुरीय

वासनानुविवेचितेति त्रिशंकाद्वयं द्वाभ्यां परिहरन्नाह ॥ गायत्री वेदमात्री श
तमखफलदा वेदत्यासैकवेद्या चिच्छक्तिर्ब्रह्मविद्या परमशिववनवश्रीप
रोत्या करोति । शास्त्रैर्लोकवाच्यामखिलमतमिति यस्कृतत्वामवाच्यांस
मस्तो तौ विनुतिं त्रिभुवनमयतां त्वं ततः सर्वतुर्य ॥ हे परशिव । उक्तनिर्व ११८
चनं । गायत्री ति गायंतं त्रायते गायत्री । तथा च छंदोगश्रुतिः । वाग्वा इदं सर्वं
भूतं गायति च त्रायते च या वै सा गायत्रीति । तां हैके सावित्रीमनुष्टुभमन्वा
हुरिति च श्रुतेः । एतौ वेदमात्री वेदानां मात्री प्रमात्री सर्वश्रुतेः गायत्र्या
प्रसृतत्वात् ज्ञातमखफलदेति । अत एव वक्ष्यमाणानि मन्त्रश्रुतिपाठ्याऽत्तो ।

त्विष्टोमाद्यास्तेषां फलानि स्वर्गादीनि दृष्टानि तत्प्रोक्ता। वेदत्रयाण्येकवेद्यस्ति
पत्तौ वेदानां त्रयाणां चैकं वेद्यं यस्मात्तच्च विवक्षितं विभतिपेगे सत्रक्ष्ये
न अग्न्यादिरचूसमासो नः परधाम प्रतिपादकत्वात्। यातेषां वेद्यानैतथा च
छन्दोगकर्तावषट्कारालत्तो। अथ सावित्र्यंगानि व्याख्यास्यामः॥ त्रिरोप्रणवाल
लाटं योग्नं ग्नादिलोचनं हृदुषी मुखमग्निर्जिह्वा सरस्वती त्वग्नीवाव मस्व। ११९
प्ररुद्राग्भेबाहुदरीवायुः पृष्ठमिंद्रो विष्णुर्नाभिः प्रजापतिर्जघनमस्म
मरुतौ वेदाः पादौ ग्नितं विद्युद्दृष्टं सितवासुरस्त्रीनिपर्वताः समुद्रा धा
सांसि नक्षत्राणि एपलंकारो यएवं वेद रुद्र एताद्रूपपुत्रकाम्यकाधिका च स

वीसाक्षस्त्विदेवकृषिमन्त्रब्रह्मसवं च पातुमामिति। ब्रह्मसवं च पातुमा
मिति। योगीश्वरः। गायत्रीच्चैव वेदांश्च तुलया तोलयत्प्रभुः। एकतश्चतुरो वे
दान्सांगा देवी तथैकतः। दृष्ट्वा कृत्वोपजप्ता पागायत्र्यक्षरा कृतं लघु। तस्मात्पं।
प्रणदेहाश्रुनात्रकामीविचारणेति। याज्ञवल्क्योपि। गायत्री योन जानाति ह
यात स्यपरिश्रमः। एकतश्चतुरो वेदाः गायत्री चैकतः समा। पमः स्मृतावा।
पि न तया वेदजाप्येन पापं निर्दहति द्विजः। यथा सावित्रिजाप्येन सर्वपा
पैः प्रमुच्यते। गायत्रीमात्रसारोपि वरं विप्रः सुयंत्रितः। नायंत्रितः सर्ववे
दः सर्वाशी सर्वविक्रयी। इति वेदानां त्रयाणां चोपक्रमोपसंहारयो

गायत्र्यामेव पर्यवसितत्वादित्यर्थः। कूर्मपुराणेपि। सावित्री सर्वज्ञात्मानामि
ति। पद्मपुराणेपि। सावित्री वापि गायत्रीति। चिच्छक्तिरिति। चित्त्वं चैतन्यं प्र
ज्ञोपलब्धिश्चित्संविद्विदितिनिघंटवः। शक्तिः। चिद्रूपं सामर्थ्यं। तथा चेश्वर
प्रत्यभिज्ञायां। चितिः स्वतंत्रा विश्वसिद्धिहेतुरिति। अत एव ब्रह्मविद्यानु
भवोपायो वा ब्रह्माकारैव विद्या। तदुक्तमथर्वशिरश्रुतौ। सा विश्वमहंदृ २२०
ति। तत्र श्रीपरेति। श्रीपराणि वीरुक्तनिर्वचनावाक्। तथा च वाजसने
यिश्रुतिः। गायत्री वा इदं सर्वं भूतं यदिदं किंच वाग्वै गायत्रीति। शब्द
ब्रह्मैकवाच्यामिति। शब्दब्रह्मणः। तथा चाथर्वणश्रुतिः। शब्दाक्षरं परं

ब्रह्म तस्मिन्क्षीणे यदक्षरं। तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छांतिमात्म
नः। द्वे ब्रह्मणी वेदितव्ये शब्दो ब्रह्मेति विश्रुते। शब्दब्रह्मणि निष्णातः परं
ब्रह्माधिगच्छति। तस्य वाच्य ब्रह्मण एकं वाच्यमर्थभूतामित्यर्थः। अ
खिलमतमिति व्यक्तत्वामिति। अखिलानि मतानि वैदिकादिदर्श
नानि तेषामिति यथा पौर्णिमवः। तदुक्तं। मितिः सम्यक्परिच्छित्तिरि
ति। तथा व्यक्तं स्फुटं तत्त्वं वैरूप्यं तंत्रगोप्यस्याः। तदुक्तं च सुंदरीमहिम्नस्तु
तौ। कौधमुनिनेव। गायत्री सावित्री सरस्वतीय संहिता संध्या त्रयी सागमे
रव्याता त्रिपुरात्वमेव महतां शर्मप्रदा कर्मणां। तत्र दृष्टीनदिव्यचात्ति

रविश्च तं ब्रह्मसकर्मेश्वरः। कस्माद्धि हंसरूपो हरिश्च सविता बुधः। शिवश्च त्वं गुरु
रिति। अथ वागक्षराणि तत्त्वानि सृष्टिव्याप्तिसंस्थानि चतुर्विंशतिः तस्या
ःश्च सप्त स्वरव्याप्तानि। तदुक्तं सारहारितिलके। यो वर्णमि गायत्री तत्त्वरूपा मि
ता। चतुर्विंशतिवर्णत्वात्तद्रूपता। तामरूरमासे वसंते। अनेन गाय
म सूरैः साईत तस्या सोपि सूचितइति पदार्थाद्दृश्येत ध्याय्याता रः। अ
सह रमासोपि सूचितः चतुर्विंशतितत्त्वरूपतो कोपयत्र गौ रवग्निमान २२१
प्रपंचिता। ततो विज्ञातव्या नीया। अत एव वाच्यां तत्त्वरूपतया विश्वरूपता।
दक्षुमहाकामिसर्पाः। यतुष्टो वसिष्ठं तेषड्विंशत्तत्त्वानि गायत्री तु चतु

र्विंशहरूरेति। ततच्चुरीयविवेचने यथाक्तोमविष्यति। सप्तसंतो तो विभूतिमिति।
सप्तसंतो तां मित्र राहीनि विभूतिर्यस्याः। उक्तं च तंत्रांतरे। शून्यः परात्पररूपतयोपशूद्य
ष्टः स निवर्त्तते। तत्सद्वंसद्वितिप्रोक्तं तन्मात्रवान्वृत्तरतः। भूतत्वात् कारणत्वाद्ब्रम
हृते। ब्रह्मसंगतिः। तद्देवसर्वज्ञनता तस्माच्छुर्भाहृतिजनः। तपोज्ञानतपश्चे
वतप्यास्तपतयास्मृतं। ससंपरत्वाद्धानं तज्ज्ञानतः स्मृतं। प्रणवस्यायाहृतिनां
गायत्र्येकमयोच्यते। अकारो भूरुकारात्म भुवोमार्गः स्वरीरितः। विंदुर्महस्त्व
था नादो जनशाक्तिस्तपः स्मृतं। शांतिः सत्यमितिप्रोक्तं यत्नेसरतरंपदं। तद्वि
तीयेकवचनं मनंताखिलस्तुनेः। सृष्ट्याद्दिकारणं तेजं परं ब्रह्माभिधायते॥

व

यत्र सवितुरित्युक्तं षष्ठ्येक वचनात्मकं। धातो रिह विनिःपन्नं प्राणिः प्रसव वाच
कात्। सर्वासां प्राणिजातीनामिति प्रसवितुः। सहावरेण्यं वरणीयत्वात् प्रार्थ्य
त्वात्सेवनीयतः। पूर्वस्याष्टाक्षरस्यैवं आहुतिर्भूरितीरिता। पापस्य भंजना
द्भर्गो ~~हस्यैवं आहुतिर्भू~~ न कस्निग्धतया पथवा। देवस्य दीप्यमानस्य सूर्य्या
दिगुणिनस्तथा। ध्यै चिंतायाम तो धातो र्निष्पन्नं धीमही सततः। हीनतारहि १२२
तं तेजो निष्पन्नं धीयः स्यात्स्तु हिरण्मयः। सुसूक्ष्मः सोहमित्येवं चिंतयामः
सदैवहि। द्वितीयाष्टाक्षरस्यैवं आहुतिर्भुवरीरिता। धियो बुद्धिर्मनो रमंछेः
दस्तत्वाद्य ईरितः। कृतश्वासिंगमसासः सत्त्वाक्षुसिद्ध पदस्य हाता। यत्र तेजो नि

रूपकं सर्वदेवमयात्मकं। न इति प्रोक्तं आदेशः षष्ठ्यां वकिति चास्य तः। तस्मात्
स्मात् कमित्यर्थः। प्रार्थनायां प्रचोदयात्। तृतीयाष्टाक्षरस्यापि आहुतिः स्वरिती
रिता। आपो ज्योतिरसमिति सोमाग्नी तेज उच्यते। तदात्मकं जगत्सर्वं रसते
जो द्वयं स्मृतं। अमृतं तदनादित्वाद् ब्रह्मत्वाद्ब्रह्म गद्यते। यदानंदात्मकं ब्रह्मस्य
ज्ञानादिलक्षणं। तद्भूर्भुवः स्वरित्युक्तं सोहमित्येव मुदाहृतं। एतच्चतुर्वेदसामर
स्यमित्ररत्वाच्छिरईरीतमिति। त्वत्वं सर्वं बधिनी। त्रिभुवनमयतां प्रकृतं त्रिभु
वनं त्रिभुवनमयस्थिस्तता। नवब्रह्म तथनेम यष्टा। प्रायुर्येण प्रकृतं प्रकृतं
तस्य वचनं प्रतिपादितं। मित्यर्थ इति व्याख्यान्हृता। अत्रार्थप्रमाणं श्रुतिपूर्वं

भिरो ब्रह्मा लव्यादंघो रिसवोचाम। अस्मा छंदोगोपनिषद्यपि प्रजापतिर्लोकां
स्तामतपत्तेषां तप्यमानानां रसान्प्राबृहदग्निं पृथिव्या वायुमंतरिक्षादादि
त्यं दिवः स एतास्तिस्रो देवता अभ्यतपत्तासां तप्यमानानां रसान्प्राबृहदग्ने
ऋचो वायोर्यजूंषि सामान्यादित्यात्स एतां त्रयीं विद्यामभ्यतपत्तस्यास्त
प्यमानाया रसान्प्राबृहद्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्य इति १२३
इती रीमां व्याकरोतीयतः कथ्यं यति तस्मात्। तथा च छंदोगश्रुतिः। सेयं दे
वतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेन। त्मनानुप्रविश्य नाम
रूपे व्याकरवाणीति। त्रिजगन्चंद्रिकायामपि। विश्वमेतत्रितयामह

ससोनामरूपविवरेणानिष्क्रांतिः। सालंबं बनबिन्दुपासतां तान्यग्नीस्यसि
धर्मिणी त्रितुरीति। ततस्तस्मात्स्वं सर्वं तुर्यः सर्वस्मात्सर्वं त्रित्रिसंकेति तानुर्य
ः तुरीयोसि। तथा च वाजसनेयिश्रुतिः। गायत्र्येकपदी द्विपदी त्रिपदी चतुष्प
द्यपदसि न हि पद्यसे। नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो
मीति॥ योगयाज्ञवल्क्येऽपि। तुरीयं तु पदं तस्याः परं ब्रह्मणि संस्थितमिति॥
त्रिजगन्चंद्रिकायामपि। तद्यतत्प्रपन्नववर्वणात्मकं ज्ञागुरादिपदं वप
त्रिधागमं। यत्तुरीयमपि तद्विलापनं नाव तत्त्वमसि विलेत्रिजंनसे इतिवद
ते च गायत्र्याः परत्रिवपरतासोपपत्तिर्विभूतियोगे। वेदा गायत्रीति पाँवसु

मात्रशब्दस्तत्वादिव्यावर्त्तमम्लः। स्वरूपादिषु मात्रशब्दस्य जननीवाचिनो
ग्रहणात्स्त्रीरूपोऽर्थो डीबीति प्रमाणवाचीनुरूपदः। अलंकारस्तु विशेषणं सा
भिप्रायतया परिकरः। गायत्रीति। विशेष्यसाभिप्रायतयात दंकुरोऽपि। वि
शेषणानामस्मोस्म हेतुत्वेन कारणमाला वि।। पूर्वं वा कार्यं स्मोत्तरं प्रति हेतु
तया काव्यलिंगमपीति।।१३।। संसारासारनावप्रहरणचतुरामादिशक्तिं १२४
परांतां स्वात्माभिन्नां विदित्वा वसुरसुमतिभिन्नोऽहं हेतुनाहं कृतस्वः। एका ३
ग्रं ब्रह्म विश्वप्रसरमनवधिस्वप्रकाशप्रपूर्णं ज्ञात्वा मुक्तः स योगी भवति
गतभवस्तस्य सादाम्न हेतुत्वात्।। हे महेशेति। महत्वाति वामहीयते महान्स

वामावीराध्वेति। भक्तानुग्रहकारक। तदुक्तं अथर्वशिरसि। अथ कस्मा
दुच्यते भगवान्महेश्वरो यस्माद्भक्तानुज्ञानेन योगीश्वर्येण महयति म
हीयते वा महेश्वरः इति। कूर्मपुराणेपि। ईश्वराणां महेश्वर इति संसा
रसारभावनौप्रहरणचतुरामिति।। संसरणात्मकस्य संसारस्य योऽसा
रभावो जननमरणरूपस्तस्मार्त्त्वं तस्य प्रहरणं प्रकृष्टं हरणमपुनरावृत्तिरू
पं तत्र चतुरां दक्षां। दक्षेतु चतुरपेशलेति कोशः। तदुक्तं मनियुक्तैः। ब्र
ह्मांडबुद्बुदकदंबकसंकुलोऽमायो दधिर्विविधवस्तुतरंगमालः।। अस्य
मंवा। फटितिप्रलयं प्रयाति यस्यान संततिमहावडवामुखाग्निविद्धि

एवं च वस्तुमात्रस्य मायिकप्रपंचस्य कार्याच्चित्कावुद्भवलक्षणावच्छिन्नस्यात्मैव ।
सृष्टिर्नो भवतः । आदिशक्तिमिति । यथा च कूर्मपुराणे । या सा हेतुः प्रकृतिः
साप्रधानं बंधः प्रोक्तो विनियोगोपि तेन । माया शक्तिः प्रकृतौ रूपा वेदेषु
का कारणं ब्रह्मयोनिः । तस्मा एकः परमेष्ठी परस्तान्महेश्वरः पुरुषस्य
रूपा इति चतुःश्वासामपि । कूटस्थयात्मिकां देवीं समष्टिं समष्टिरूपिणीं । आ
द्यां शक्तिं भावयंत इति । तां प्रसिद्धामुपक्रांतां वा । अत एवापं तच्छेषपक्ष । १२५
निरपेक्षः । तदुक्तं काव्यप्रकाशे । प्रसिद्धोपक्रांतविषयपरत्वच्छेषपक्षं इदं
नापेक्षत इति ॥ अत एव परामृश्य तस्याणां गायत्री वाचं । परं चं वक्ष
ध्यं

माणेषु उन्नयपरत्विमचक्रचक्रवर्तित्वेन । २ ॥ तथा च छांदोग्यश्रुतिः । से
यं चतुष्पदा षड्विधा गायत्रीति षड्विधत्वं चापवर्णे पुरुषोऽस्य कांडे परं
प्रकृतौ वगायत्री वा स नामुक्तोप संहारे षष्ठोपनिषदि प्रागुक्तषोडावा
मनो या या षडुन्नयपरत्मीनां प्रदर्शनात् । प्रागुक्तवाजसनेयिश्रुतिरपि
वाक्याः षड्विधत्वेमानं । तच्छ्रात्नुपदमेव पराशक्तिप्रकरणे वक्ष्यते । स्वात्मा
भिन्नां विदित्वेति ॥ स्वात्मनोऽभिन्नां विदित्वा विज्ञाय । स्वस्यात्मनो जी ।
वस्याभिन्नां वा ब्रह्मात्मानं । तथा विज्ञाय वनं । अत्र प्रमाणं । ममैवांशो बहूवो जीव
लोके इति । स्वात्मैकाननया विमृश्य रूपेते सर्पः । वपुरसुमतिभिरिति । वपुषि

देहेऽस्तु मतयः। आत्मबुद्धयः। अनात्मनि नश्वरीरेंद्रियसंघाते च अस्मिन्क
मात्मबुद्धिबाढं कुर्वतो क्लिश्यता प्रतिजनुरनुमाविताऽनुरूपमानानु
भावयिष्यमाणं वपुषां प्राचुर्यात्। ताभिः नाहं त्वांहं कृतिस्यादृशि। नाहं ता
न आहृता। न जर्यस्य नस्मा हृतनष्टेन सुषुप्तिर्यो गधिनाः नाशमाप्तः
साचावरं संस्कृतिश्च तत्त्वस्थः। विदिरेवेति। पूर्वकाल्यवाची विदिरेवेति स्का। १२६
प्रसपः। पूर्वनिरुक्तपरागांकैः। स्वात्मैकाप्यरामर्षस्य देहाहंभाव श्रूत्य।
शुद्धसंविद्रूपपराहंताऽस्थितं देहेतो हेतुत्वं द्रढयति। तथा च कस्मात्तरे
अनात्मयं तस्य वितुर्वरेण्यं भर्गो हि देवस्य हितायधीमहीस घ्यः सतां

स्के त्राह रं हिताय। धियो यो हि योनः सति तं प्रचोदयात्॥ अपि स्वां प्रतिपाद्येत गायत्री
ब्रह्मणा। सोऽहमस्मीत्युपासीत विधिना येन केनचिदिति। स्वतंत्रक्रमेतृक्तं श्रीम
दाचार्यैः। स्वदेहेऽद्भुतानिर्घृणनिरणिमाद्यमिरगिनतो निषेद्धो नि सेव्या महंस्मि निसदा
भावयतियः। किमाश्चर्यं तस्यात्रिनयन समृद्धिं रुणायतो महासंवर्त्ताग्निविर
चयतिनी। राजन विधिमिति। तथा च परमप्रेमास्पदपरमसुंदरस्य तात्
स त्राशिंगवस्कन्नो निस्सरंगसहजानंदबोधस्वात्माऽहं भावना वनया वि यन्नित
मयत्र यानिमानः परहंताच्चीत्रीपरमशिवभट्टारक एवसद्दृश्यर्थः। अस
एवैतै कात्म्यमिति। तैकात्म्यं अव यवतयोपाधिवशात्स्रतीयमानमित्सर्था। वि

कालः। चातुर्वर्ण्यादित्वात्ष्यञ्। सर्वदाप्रतीयमानमित्यर्थः। विश्वप्रसरमिति। वि
श्वस्य व्यापकस्य शिवादिक्षित्यंतषट्त्रिंशत्तत्त्वात्मकस्य प्रसरः प्रमातृप्रमेयप्र
माकारतया व्यवस्थितिरूपस्तं। स्वप्रकाशात्मप्रपूर्णमिति। स्वो निजो नित्यः प्रका
शो निरूढरीत्या ग्राह्यग्राहकसंबंधेन तत्तत्सहायाकारतया स्फुरणरूपेणात्मेन
पूर्णं चांतर्बहिः सैंधवघनवत्स्फुरत्तीयमानमित्यर्थः। अत एवानवधि। देहका
लाकारैरपरिछिन्नमित्यर्थः। परिछेदे हेदे वलावधिरिति कोशः। ब्रह्मावृहत्वाद्बृ १२७
हत्वाद्बृंहयतिवा तस्मादुच्यते परं ब्रह्मेति। ज्ञात्वा। यथापरायागायम्यः स्वात्म
नाऽभेदेनस्यापंचपापंचमृतमयं विश्वं तन्मयीलं सहानघेडूति तं त्वां तरो

करीत्या विश्वस्याविप्रपंचाकारेण प्रोद्भासितं ब्रह्मैवेति श्वेत्यर्थः। तथा च विज्ञ
ग नचंद्रिकायां। सर्वं कालिकमिदं जगत्स्वयामासते विधुरज्ञाष्टरूपया। अं
तरंजननि बुद्धिदर्पणे बाह्यमेसमलरूपमद्वयमिति। मुक्तो यदृति। वास
नाज्ञानवैरागमुक्तिरित्सन्निधीयते। एषा च परमावस्था जीवन्मुक्तेषु विद्यतेति
योगवासिष्ठे। कः रीत्या जीवन्मुक्तइत्यर्थः। सयोगी योयः शिवाहंभावलक्षणो
निरूढमत्यानुग्रहस्वक्रमप्रवणाद्वित्यर्थः। तदुक्तं कुलार्णवे। यो निमुद्रानुसं
धानप्रस्फुरंमंत्रभैरवात्। गीर्वाणगणपूज्यत्वात् योगीति कथ्यितः प्रियेद्ध
ता। त्वत्प्रसादात् त्वदनुग्रहीप्राप्य इत्यर्थः। कपटीयेपंचमीति रूढकतिरीत्या

महेशस्यैवतादृशानुग्रहहेतुत्वादितिभावः।गतःभवःसंसारोयस्मात्सोक्तः।सं
सारस्यैवासारस्यस्वरूपतानुभावनेनमहासारवताप्रतिपादनादित्यर्थः।नि
वृत्तिसन्मात्रंतिष्ठतीत्यर्थः।किंचित्कालंजीवन्मुक्तावस्थांतुरीयतयानुभूय
विदेहमुक्तोमहासमुत्रयातिष्ठेदितिफलितं।तथाचकौथुमीश्रुतिः।गाय
त्रीवाइदंसर्वमित्युपक्रम्यतदेतत्पूर्णमप्रवर्त्तिपूर्णमप्रवर्त्तिनींश्रियंलभ १२८
तइति।वक्ष्यतेचविभूतियोगे।अलंकारस्तुपूर्वपूर्वस्योत्तरप्रतिहेतुत्वात्का
रणमाला।वाक्यार्थहेतुकंकाव्यलिंगंचयमपि॥२४॥अथयेकेनाप्यतत्त्वनिर्ण
यस्यदृष्टिकंदृष्टुरवात्कर्णाकर्णिकयासंप्रदायक्रमेणाधिगमंप्रपंचयतितस्य

त्रतर्कपितुरनिष्ठमाचष्टे॥विश्वेशस्यप्रकाशप्रसरमिहविनानामदृस्ती
नितत्त्वमीमांसारूपमेतत्तत्त्वपरमगुरोःश्रीमुखाम्नायजातं।स्वप्रसक्तंवि
ज्ञायपत्त्वरहितमितिचेद्दृप्तिचामस्यतत्त्वंयेधीमस्तकेयेषुलग्नाइहजनिमृतीरा
भुवंसंगमनैः॥ ॥विश्वस्याशिवादिक्षितिसंतस्येश्वा॥विश्वगोतप्रोतविश्वा।त
स्यावाप्यवैशिरःश्रुतिः।अथकस्मादुच्यतेईशानोयःसर्वान्देवानीशानईशा
श्री नीभिर्जननीभिःश्रुतिभिः।अभित्वाशूरनोनुमोदुग्धाइवधेनवः।ईशानम
स्यजगतःस्वर्दृशमीशानमिंद्रतस्थुषइतितस्मादुच्यतेईशानइति।पाद्म
सरपुराणेपि।तदन्यद्विश्वमीशानःसनुद्दिश्याधिकःशिवः।यानिवेदांत

वाक्यानि तानि सर्वाणि सन्ततम्। विश्वाधिकपरात्पर्वं नैव विश्वपराणि वेद इति।
तदुक्तं काशीखंडे। उपरिष्टात्स्थितेरष्टौ कोटयः स समीरितं। सप्तद्वीपपरि
वैकुंठे गोप्रोक्तानां प्रमाणतः। मूलेो कालरि संख्यातः कोटिषोडशसंमितः॥
यत्रास्ते श्रीपतिः साक्षात्सर्वेषामन्नयप्रदः। ततस्तु षोडशा गुणा के लोकोस्ति
शिवालयः। पार्वत्या सहितः शंभुर्गणास्कंदनंदिभिः। यत्र तिष्ठति सर्वेषा १२९
:सकलः सपरः स्मृतः। तस्माद्देवस्य विलोयं सर्वा यामूर्त्तिधारिणः। स विश्वे
इत्याख्यातो स्तहाज्ञात्रहिरंजगदिति॥ ये च धीराः ब्रह्माण्डधारसाधके
मो विपरीताः। इह संसारे। स्वप्रकाशापरं विनेति। स्वप्रकाशो निरूल

ह्मणस्तस्य प्रसरः। तदुक्तं दैवंगे। सा सा सर्वेश्वरी देवी सस देवमहेश्वर इति। तं
विना स्वरूपं तत्त्वमनुभावनीयं नास्तीति प्रकारेण मीमांसात्वं। विचारणार्था
न्मानधातोर्मान्वधदानशानेभ्यो दीर्घश्चाभ्यासस्येति सनंतात्प्रत्ययादिति
स्त्रीप्रत्यये युसन्नामीमांसा वेदांतास्तेषामुत्तरमीमांसेति प्रसिद्धेन रूपं। रू
यति रूपं तस्मात् रूपं तन्निरूपांत इत्यर्थः। स्व प्रसह्यमिति। स्वस्याध्यरूविषयं
। सर्वं सर्वेतत्त्व सर्व समये कार्यं द्रियाणं नरान हि यद्रूपीक कर्म निरिदं
संव्यस्तु वानापरा॥ वागर्थव्यवहारकारणतनुः शक्तिर्जगद्व्यापिनी यकी
आत्मकला गतातवह्निवितत्त्वौमि वीजं परं इति सुंदरीमहिम्नस्तुतौ कोथ

मुनिंनलितरीसाविश्वात्मकतयाएवतस्याध्यात्वविषयत्वात्।तदुक्तंयोगवासि
ष्ठे।आगकारणमेवाशुसर्गादौसर्गलीलयास्फुरित्वाकारणंभूतंस्वयमात्मनी
ति।अकारणमेव।तोब्रह्मकल्पमिदंस्थितं।प्रसन्नमेवनिर्मातुंस्तंभंत्रास्वतु
मात्रपइतिच।परमगुरोस्तवैतदेतावता।प्रबंधेननिरूपितो।गुरूणामपिपरं
परया।गुरुत्वात्परमगुरुत्वं।तदुक्तंमौनाख्यमंजर्यां।स्वस्तिश्रीमत्परमशिवप १३०
दाब्जपारंपर्यक्रमेणस्वगुरुपादांबुजयुगंयावन्नावस्वमोमीति॥श्रीमुखाम्ना
यजालमिति।श्रीःशरणागतजनपशुपाशापाटनपटीयसी।तयोपलक्षिता
निमुखे रवानित्रस्थंआम्नायाः।पूर्वदक्षिणपश्चिमोत्तराख्याःपंचगिरीशाना

दिमुखैः।प्रत्येकंजप्यमानाःसंप्रदायाः।तदुक्तंवामकेश्वरतंत्रे।पूर्वपश्चिमदक्षं
चनत्तरंचनिरुत्तरमिति।प्रतिवक्त्रंविभागवता।विभागस्तुदक्षिणमूर्तिसंहि
तायां।पूर्वसिंहासनगताविद्याजप्यामहेश्वरि।देवीतत्पुरुषास्येनजप्यतेत
च्छृणुप्रियेदक्षसिंहादक्षिणास्येनदेवेशिलक्षितात्रिपुरापरा।कामेश्वरीरक्तने १३१
त्रामयाद्यापिप्रजप्यतइति।देविपश्चिमवक्त्रेणमयाद्यापिप्रजप्यतेदक्षादि
गुत्तरास्येनदेवेशिमयाद्यापिप्रजप्यतदक्षाद्यथेशानेनवक्त्रेणमयाद्यापिप्रज
प्यते।विद्यानांपंचकंदेविविशेषुलोकेषुदुर्लभमिसारिता।तदुक्तंमद्रुक्तसं
वर्गीता।पंचशिखरगतकोशाकल्पतरुकल्पलताशिविकाश्री।पश्चपविन्न

स्वन्तत्रमन्त्रस्त्वमसमलपत्नीत्वमिति। विशेषस्तु मानृकास्कंधरत्विमांविवेच
नेत्वं महाम्नायविद्यासारःस्फारस्वरूपइत्यत्र व्यक्तीकरिष्यते। तेषां जालमि
वजालं॥ आनीयः पुंसि जालस्यादितिकोशः॥ यथा जालस्य विस्तारोपसंकुचती
यमाना अपि तंतवो मूलवलये संहताः कवलीकृता सकलसंप्रदायाः पा
द्विंशान्तलात्मकतया परिणता अपि लदहनसरोजपंचकरूपात्वे इत्यर्थः। त १३२
दुक्तं गुरुपादुकास्तोत्रे॥ वागुरामूलवलये सूत्राद्याः कवलीकृताः। एवं कुला
लविज्ञानं पादुकायां प्रतिष्ठितमिति॥ तदुक्तं मांवगीतायां च प्रांभुकारमन्त्रखे
:खिलागुहाकुंजैकवासप्रियः॥ शुंडाध्वः सटयासके सरइव चोतन्त्रारिस्री

करैः। विद्यावृंहितघुर्घुरावमहानी मोग्रवापतिर्जायाद्वंकुजाधारमन्मथगज
सोमेकपंचाननइति॥ विहायसत्काचत्वर्थः। अन्यदपीत्यर्थः। स्वरहितमि
तिस्वप्रकाशावर्जममतन्तत्वं तत्त्वमसीत्यादिविषयमस्तीति तर्कयेयुः। श्रे
यदि। प्रमितस्यार्थस्यामयाविज्ञावनं चरेयुः। विधिनिमंत्रणे संप्रश्नार्थे लिङ्
। संप्रश्नः संप्रधारणं। अवधारयेयुरित्यर्थः। ते च दृधीच्यादि शापाः कलिबल
कलुषिता वा। तदुक्तं कौर्मे। एवमुक्त्वा विप्रर्षिः शापाप्येश्वरविद्विषः समागत
न्ब्राह्मणान्दृष्ट्वा न्स्वसाहाय्यकारिणः। यस्माद्बहिःकृता वेदाज्जवह्निः परमे
श्वरः। न विष्ण्यत्रयी वाह्या सर्वे पीश्वरविद्विषः। निंदं तो स्वैश्वरंमार्गं कुशा

स्नाः सकृमानसाः। मिथ्याधीनसमाचाराः मिथ्याज्ञानप्रलापिनः। प्राप्य घोरं कलियुगं
कलहैः परिपीडिताः। संस्कारतपोबलं कृत्स्नं गच्छध्वं नरकान्पुनः। भविष्यति हृ
षिकेशः स्वाश्रितेष्वपि परांमुख इति। तत्रैव। कुर्वंति चावतारांश्च ब्राह्मणानां कु
लेषु वै। दधीचिशापनिर्दग्धाः पुरा रुद्राग्निरे द्विजाः। निंदंति च महादेवं तमसा
विष्टचेतस इति। मोहेपि पुरुषोत्तममाश्रित्य सन्निवनिंदापराः द्विजाः। कलौ यु
गे भविष्यंति ज्ञाना तत्र न माधव इति। ते च प्रस्तुसस्कां देवांकारगीतायां। नेदं १३२
तपस्कायेत्यायां न स्वबन्धुबहिष्कृतमिति। कोसावितिज्ञापांकायां तत्रैवाह धानी
नागौतमेन ये शाप्ता ब्राह्मणधर्माः। कलाववतरिष्यंति निंदकास्ते बहिष्कृता

इति। कलौ रुद्रो महादेवो देवानामीश्वरः परः। न देवता भवेन्नृणां देवतानां च दैव
तमिति। लैंगेपि। तएव च वर्कपितार इत्सर्थः। यथा नैयायकवैशेषिकयोर्निस
ज्ञानादिगुणवान् कार्यलिंगानुमेयोऽनंतेभ्यो जीवेभ्यः पृथगीश्वरः इति। पातं
जलियानां क्लेशकर्माद्यनुपस्पृष्टो ज्ञानात्मा जीवेभ्योऽन्य इति। सांख्यानां तु नि 633
र्लेप पुरुषो किंचित्करः प्रकृतिमयमिदं पुं बद्धत्वं चेति। जैमिनीयानां तु क
र्मैव योनीश्वरः परमात्मा वा दिकार्यं विश्वमिति। ये चान्ये च तदनुगुणास्तिर्हि तेकु
तार्किकाः इह संसारे द्विगारूढा इतराश्च श्रभीशस्यं घोतयति। पुनःपुनरसिम्
।। अंगनो रेरिति। अंगानामवयवानां नारी नरणरूपप्रयोयेपु तैरंगनो रे

दृष्टैरसर्पः॥ देहानां बहुत्वमपि देहरूपितं क्रियासमभिप्रायं हारं दृष्टपति। यद्वा
शंगेतिसंबोधनं। स्मृतःप्रार्थ्याऽहंगृहे हैतोइति कोऽत्राः। नारै प्राकृतं नचपैः। अ
मतइति जनिरणादिभिन्नो जन्मवाची म्रियतइति मृतिः। कृतिक्रियमिद्या॥
तास्वेतास्वताः जनिमृती जन्ममरणानि आसुवंति लज्जंते। कोऽर्थः। एवावता
प्रबंधेन अवस्थापितमेतस्मात्नुनवैकवेद्यं विहाया महात्मनोपि तत्वांतरं सं १३३
सारवयतामेवपोनःपुन्येन संसरंतोऽज्ञानुनवद्दसर्पः। तथाच छंदोगश्रुति
ः तानीमानि भूतानि एषसकृदावर्त्तीनि भवानि भवंति जायस्व म्रियस्वेतीति
मुंडकश्रुतिरपि। एतच्छ्रेयो येभिनंदंति मूढा जरामृत्युं ते पुनरेवापियंति

ति। अविद्यायामंतरे वर्त्तमानाः स्वयंधीराः पंडितंमन्यमाना इति। शकुनीना
मिवाकाशे जले वारिचरस्य वा। पदं यथा न दृश्येत तथा ज्ञानविहांगतिरिति
श्रुतं तरोक्तेरेणुः पंथा वितरः पुराण इति दुर्विज्ञायत्वेनास्य वाकार्यहेतु
कंकाव्यलिंगमालंकृतिः॥२५॥ अथेत्थं तत्स्वप्रक्षिपाद्येकेन तत्वांतरत्रै
कालिराकरोति॥ न ब्रह्मा विष्णुरुद्रौ सुरपतिरमरा नासुरा नैव पृथ्वी।
नापो नाग्निर्न वायुर्न च गगनतलं नो दिशो नैव कालः॥ नो वेदा नैव यज्ञा न
च रविचंद्रौ नो नो विधिर्नैव कल्पाः। स्वज्योतिः सत्यमेकं जयति तव पदं स
च्चिदानंदमूर्ते॥२६॥ ननु सर्पाचंद्रमसो धाता यथापूर्वमकल्पयदिति श्रु

ह्येव कथं नस्यादित्याह॥ न ब्रह्मेति। ब्रह्मापि न। तदुक्तं कूर्मपुराणे। समस्त्रिपि गतो
ब्रह्मादिरेवो मन्नावसाविनः। दिव्यं तन्नाम कैश्वर्यं सर्वदा वहते निखयं इति वापि
ष्टपि। परमेष्ठापि निष्ठावा नेति। नन्वग्निर्देवानामवमो विष्णुः परमस्तदन्तरेण
सर्वाअमादेवताइति बह्वृच ब्राह्मणे नारायणोपनिषदि। पतिं विश्वस्यात्मे च
श्वरमिति महोपनिषदि च। एको ह वै नारायण आसीन्न ब्रह्मा नेशानइति १३५
अथर्वशिरसि च। यो वै रुद्रः स भगवान्यश्च सर्वमिति विष्णुरुद्रौ वा कथं नस्या
दित्याह॥ विष्णुरुद्रावपि न। अत्र मैत्रेयश्रुतिः। तस्य प्रोक्ता अग्र्यास्तनवो ब्र
ह्मरुद्रो विष्णुरिति स य एषो ह खलु वाचास्य राजसोंशोऽसौ स योऽयं ब्रह्मा यो

ऽह खलु वाचास्य तामसोंशोऽसौ स योऽयं रुद्रः। अथ यो ह खलु यो वाचास्य सात्विकोंशोऽसौ
स योऽयं विष्णुरित्यादिना तमो वा इदमेकमासेति पूर्वं प्रयुक्तं तत्तोऽधिष्ठातृब्रह्मा
दिभ्यः परत्वया विवक्षितत्वात्। ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तय
इत्यादिनोक्तरत्र तेषां शक्तिविवर्त्तत्वसमर्थनेन प्रतत्त्वमेव स्थापयिष्यमा
णत्वाच्च। सूतसंहितायामपि। उमार्द्धविग्रहा शुद्धा त्रिनेत्रा चंद्रशेखरा। नील
ग्रीवा परानंदप्रमोदा लौडवलिप्रिया। ब्रह्मविष्णुमहादेवरूपा या गुणमूर्त्तिभिः॥
तया व्याप्ता परा मूर्त्तिरित्येषा साश्वतां श्रुतिरिति। न च विवक्षितेपरत्वेषु
णी रुद्रांशका॥ नामेकं तु ब्रह्मविष्णो तस्य प्रसामत्तिविज्ञेषमदर्थानार्थं॥

तदुक्तं सूतसंहितायां। तत्रायः पिंडवद्धि प्रारूढमूर्त्तिः परस्य तु। मूर्त्तिस्तु साम मू-
र्त्तिर्मोक्षहेतोर्मुनिसत्तमाः। परतत्वस्य नामानि प्रसामस्याम्मुनिश्वराः। त्रिमू-
र्त्तीनां तु रुद्रस्याप्यभिधानानि सुव्रता। इति। शिवपुराणेपि। स एष भगवानी-
शस्तेजोराशिरनामयः। अनादिनिधनो धाता भूतसंकोचको विभुः। परमै-
श्वर्यसंयुक्तः परमेश्वरभाषितः। तच्छक्त्याधिष्ठितः शश्वत्तच्चिह्नैरुपलक्षि- १३५
तः। तन्नामनामा तद्रूपस्तत्कार्यकरणक्षमः। तत्तुल्यव्यवहारश्च तदाज्ञाप-
रिपालक इति। वक्ष्यते चोत्तरत्र निःसारत्वं च प्रकादि सच्चा। कूर्मपुराणेपि।
योपि नारायणोऽनंतो लोकानां प्रभवोऽव्ययः। ममैव च परा मूर्त्तिः करोति परिपा-

लनमिति। वासिष्ठेपि। क्षिपंते हरिरप्यजः। नवोप्यनादिमायातीति च। न चैवमा-
नादिपदानामिव नारायणादिपदानामसाधारण्यं। अन्यथा विष्णुपुराणेपि। ब्र-
ह्मा नारायणाख्योसौ कल्पादौ भगवान्यथा। नारायणाख्यो भगवान्ब्रह्मा लोकपि-
तामहः। कूर्मपुराणेपि। अवाप्य संज्ञां गोविंदात्पद्मयोनिः पितामहः। नारायण-
ख्यो भगवान्यथा पूर्वं प्रजापतिरिति। आश्वलायनस्मृतावपि। तस्मादंगरस्तत्र
स्थित्वा चतुराननः। सर्वलोकस्य निर्माता ब्रह्मा विश्वसृजां पतिः। स चाप्र-
स्तुत्वाप्यनादिदेवं शिवात्मा स्वेच्छयाचिरं। नारायणाख्यामगच्छच्छक्तिरूपः प्रजाप-
जापतिरिति। एवं च शक्तिरूपताप्यनयोः सिद्धाः। परस्य ते च महोपनिष-

होऽपि परमशिवपरतोऽन्यत्रेसत्प्रपंचेन। ननु प्रतर्दनो ह वै दैवोदासिरिंद्रस्य
प्रियं धामोपजगामेत्यत्रेंद्रस्यैवोपपादितत्वादिंद्रः कथं न स्यादत्राह। सुरप
तिरिंद्रोऽपि। न। कूर्मपुराणे। योऽप्यत्रोपजगच्छास्ता शास्त्राकः सर्वामरेश्वरः। यद्वचनात्
नरो देवो देवो देवनियोगत इति। स नेंद्रः। त्वात्मत्वम् प्राणः प्रज्ञात्मत्वमित्यर्थः
अत्रात्मषष्ठ्युपनिषत्। स एतमेव पुरुषं ब्रह्म ततममपश्यत् इदमदर्शमिति
तस्मादिदंद्रो नामेदंद्रो ह वै नाम तमिदंद्रं सन्तमिंद्र इत्याचिचक्षत इति॥ १३६
इंद्रः कदाचिदसुरविमर्दस्तत्रापि महान्तमभिमानाग्रहाद्याविर्भूतं तं पर
रूपं त्रिविष्टपमनुगतमोहो हि वभौ— तस्मादयं निहतयोऽपदिष्ट इति

बष्कारिणामुपनिषदि। वक्ष्यते च। ननु देवा याज्ञवल्क्येति विदग्धशाकल्यप्रश्ने
याज्ञवल्क्योऽष्टौ वसव इत्यादौ देवता एव कथं न स्युरत्राह। नाम इति। कूर्मपुराणेऽपि
आदित्या वसवो रुद्रा मरुतश्च तथाश्विनौ। अन्याश्च देवताः सर्वा मच्छास्त्रेणैव नि
र्मिता इति। वासिष्ठे। ध्रुवोऽप्यध्रुवजीवितः। अमराश्चापि मार्त्यमताः। तदुक्तं रामा
यणे। अग्निर्नाच्युतेऽन्यायसत्यादिसुवर्चसे। ज्ञायते सर्वमन्त्रापरोऽयम् वपु
षेनम इति॥ एवं ब्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः इति च। ननु द्वया ह प्रा
जापत्या देवाश्चासुराश्च ततः कनीयसा एव देवा ज्यायसा असुरा इति ज्यायस्त्वा
असुरा एव कथं न स्युरत्राह॥ नासुरा इति। कूर्मपुराणेऽपि। यः सर्वदेहेषु नाथ

लापमानां फलप्रदः। मन्त्रिणो मा दृष्टो देवो वर्त्तते निर्वृतिः सदेति। यत्तु रत्नः पिता
चक्षुः स्थितानां ज्ञानस्वरूपं भुव इति च। वासिष्ठेऽपि। दानवा अपि दीयन्ते इति। ननु इयं
पृथिवी सर्वेषां भूतानां मधिष्ठात्रीति सैव कथं न स्यात्। अयमग्निः सर्वेषां भूतानां
मधिप इत्यग्निरेव कथं न स्यात्। अयं वायुः सर्वेषां मधिपतिर्वायुरेव कथं न स्यात्। अ
यमाकाशः सर्वेषां भूतानां मधिपस्स आकाश एव कथं न स्यादिति चेत्तत्राह। नैव पृथ्वी। नापः २३१
। नाग्निः। न वायुः। गगनतलमाकाशश्च न। तत्त्वज्ञोऽसन्तेजोमयप्रतिष्ठार्थः
तदुक्तं पद्मपुराणे। न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न मे न नभश्चेति
। वासिष्ठेऽपि। धरापि याति वैधुर्यमिति। शुष्यन्त्यपि समुद्राश्च शीर्यन्ते तारका

धापीति। व्योमापि विलीयत इति। ननु विमा दिशः सर्वेषां भूतानां मधिपतिर्दिश एव
कथं न स्युरत्राह। नो दिश इति। तथा च श्वेताश्वतरश्रुतिः। एषो हि देवः प्रदि
शोऽनु सर्वा इति। अथर्वशिरःश्रुतिश्च। सोऽन्तरादन्तरं प्राविशद्दिशश्चान्तरं समा
विशदिति। वासिष्ठेऽपि। दिशोऽपि हि न दृश्यन्ते देशोऽप्यमोपदेशागामीति। एतेन
सर्वासां मधुविद्यानां स्थूलानां तर्यज्ञनेऽदनीयत्वेनास्य चान्तत्वेन प्रपंचयिष्य
माणत्वात्तपरत्वमिति भावः। गौणत्वं वा सांतत्वं तत्र प्रसिद्धं। ननु ब्रह्मा
दीनां मुक्तानां कालपरिनिष्ठितत्वादित्वं। कालः सृजति भूतानि कालः संहर
ति प्रजा इति काल एव तत्त्वमस्त्वत्राह। नैव काल इति। तथा श्वेताश्वतरे तेऽस्य
त

तिः। तमाकुरस्थं पुरुषं महांतं स एव कालो भुवनस्य गोप्ता विश्वाधिकः सर्वभूते
षु गूढः। स नाद मेकं कवयो वदंति। कालं तथान्ये परिमुह्यमानाः देवस्य एष महि
मा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रं। स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालका
लो गुणी सर्वविद्यस्ते इति। तदुक्तं कूर्मपुराणे। युगमन्वंतराण्येवं तिष्ठंति म
हाप्रलये। परस्यैव परार्द्धं च कालमेतास्य थापरे इति। वासिष्ठेपि। कालो १३८
प्यकालतां याति निमित्तेष्वापि नीयते इति। ननु तिष्ठतु कालस्य मापि वेदा
द्योः सिद्धान्तां संजिहीर्षा द्युपाधिभेदमती ति विषयत्वादस्तु वेदांतस्य मित्य
त्राह। नो वेदा इति। तथा च श्रुतिः। यतो वाचो निवर्त्तंते अप्राप्य मनसा सह॥

ति। नन्वस्तु श्रुतीनां कर्मप्रतिपादकानामनित्यत्वेनानृतत्वं। कर्मणि एव तत्त्वम
स्त्वत्राह। नैव यज्ञा इति। कर्मणां सकामानामनित्यत्वाद्द्वैतोपपादनत्वाच्चेत्यर्थ
ः। नन्वस्तु कर्मणामनित्यत्वेनानृतत्वं। सूर्याचंद्रमसोः कर्मिणामुपेयतया अथ १३८
मादित्यः सर्वेषां भूतानां मध्विति। अयं चंद्रः सर्वेषां भूतानां मध्विति च श्रुत्युक्त
रीत्यास्तु तयोस्तत्त्वमत्राह॥ न च रविशशिनौ इति। तथा च ते र्चिषमभिसंभ
वंतीत्यादिरिसमपते धूममभिसंभवंतीत्यादि श्रुति रीत्या चंद्रमसो सनमो द्वेषा
नपायित्वमानत यो पामत्वेनोपेयत्वाभावादिति भावः। तथा च कूर्मपुराणे
त्यस्मात्माजगत्कृत्स्नं प्रनाशयति सर्वतः। सूर्योदृहिंविततु नेत्रा स्रुते

वैश्वयं तु वः। योपि संजीवनो नृणां देवानाममृतामृताकरः। सोमः समग्नियोगेन नी
तः सोपि किल वर्त्तत इति। एवं च देवानां नादेतस्मिन्योपयिकत्वं प्रस्तुतवि
रोधकत्वमिति सिद्धं। तथा च पद्मपुराणे। सनत्कुमारं प्रति व्यासः। निरग्निहो
त्रिणो विप्राः संति ये गृहमेधिनः। तएव सर्वफलदाः सुराणां कामधेनवः। अ
हंतो अंचं पयं च यद्दृष्टं सुपर्वणां। अग्नौ कृते न हविषा तत्सर्वं लभते दि १३९
वि नाम हस्ति सुरेशानामिष्टसिद्धिप्रदं ननु विहोग्धी धेनुर्यथा नीता सुखदा।
गृहमेधिनां। तथैवाज्ञानवान्न विप्रो देवानां सुखदो नैवेत्। निर्दग्धा तेन विघ्नं ति
प्रतिष्ठा कृदयं नृणां। ततो न जायते भक्तिः शिवे कस्यापि देहिनः। तस्माद्विधि

षाने व जायते शूलपाणिनः। यथा कथंचिज्ज्ञाता मध्ये विछिद्यते नृणां। ज्ञाते वापि
शिवज्ञाने न विश्वासो न वससमिति। प्रपंचितं चैतन्मदुपर्यपि च बादरायण
दसधिकरणे। तथा देवानां प्रसबुध्यत तदन्नवर्तिदि। वाजसनेयिसूत्रमधि
कृत्स तेन कर्मविहीनानाममराणां परत्वानुबन्धव इति। वक्षते चायमर्थ ते १४०
उत्तरत्र प्रचुरः। ए। इति शाब्दिकः। पुनस्तत्रैव मुनीनुप्रति सूतवाक्यं। इष्टापूर्त्ता
दि कर्माणि ते नाचरंति मानवाः। शिवार्पणधियाकामानुपरिसज्य यथाविधि
अनुग्रहात्तेन शंभोः सुदृढो जायते नरः। ततो भीताः पलायंते विघ्नाहि सासुरे
श्वराः। वक्ष्यते चोत्तरत्राग्निहोत्रे वाजसनेयिनां श्रुतिः। ननु मासं तु ब्राह्मणाः र

यत्त्वं तदुपात्तिविधानमेवश्रुत्यादिपठितस्य मीमांसकैरभिप्रेतत्वादस्तु तत्र
मत्राह। नो विधिर्निमंत्रणेति सत्रे व्याख्यासारः। इह तु तत्त्वमस्यमधारूपमर्थः।।
मकारपूर्वो व्यापारइति व्याख्यातं। विधौ नं प्रेरित यथा तदुपात्तिरिमयर्थः। वि
धिर्विधाने रैवेषीतिको ऽयं। विधायते नेनेति विधी यतइति वाचु समासार्थं कप
मपि सूत्रपरं। विधेश्च क्रियाकारककल्पापमयत्वादाश्चविनाचाधर्मेतया १५०
नतत्वं। तथा च छंदोगश्रुतिः। अथ यइमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते
धूममभिसंभवंति धूमाद्रात्रिमित्युपक्रम्यांतराले चंद्रमसमेतीत्युक्त्वा यथे
तमेवाध्वानं पुनर्निवर्तंतइति क्रमेणांतरं तद्य इह रमणीयचरणा रम

णीयां योनिमुक्त्वा कपूयचरणानां कपूयचरणायोनिं प्रपंच्याथैतयोः प
थोर्न कतरेणचतानीमानि क्षुद्राण्यसकृदावर्तीनि भवंति जायस्व म्रियस्वे
तीति। नन्वस्तु सकामकर्मणामारंभकत्वात्तत्वं क्वचिद्दुर्लाभः फलविधि
ः क्वचित्तु क्रमपीति रूपो विकल्प एव किं न स्यादत्राह। नो विकल्प इति।।
विकल्पो ह्यतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति कोटिद्व
यावलंबी स्यादणुर्वा पुरुषो वेति रूपः संशयापरपर्यायः। न ह्ययं यथार्थप्रमात्वं भ
वितुमर्हति। नहि जिनमनीश्वरवादिनि नास्ति केऽरिसार्वज्ञ्यं कांपरिहरन्नूप
वेक्षि ब्रह्मादिविषयश्रुतीनां पूर्वपक्षविषयतां विचारयति। स यं जी

तिरिति। स्वमिति तत्परं स्वस्वरूपमिति सर्वः। आत्मस्वरूपं त्वनुभवैकवेद्यं। अत्र प्रमा
णं मघवाल्मीकतानानां मतिरेवात्र साक्षिणी। नहि वैकर्त्तनं ज्योतिर्दीपालोकमपे
क्षते। किंप्रमाणैर्वचोभिश्च स्वप्रकाशे चिदात्मनीति। तथा च वाजसनेयिश्रुतौ
पूर्वोक्तरीत्या पूर्वपक्षेणैव मधुविद्यायामुक्तः सवा अयमात्मा सर्वेषां भूतानाम
पतिरिति प्रायुक्तकौषीतकिश्रुतिरीत्या प्रज्ञात्मा एव संनिरूपितः। ननु चेत
स्वप्रकाशकुतोऽनुभूतमत्राह। ज्योतिरिति। हीयस्पर्श्यं युते फलं दोषो न तेदसर्वथैनि
पातितं ज्योतिः। अत्र वाजसनेयिश्रुतिः। तदेव ज्योतिषां ज्योतिरिति। मुंडकश्रु
तावपि। तस्य भासा सर्वमिदं विभातीति प्रस्तुते द्वासुपर्णा सयुजे साहिना। १४१

रतीयचतुर्थपंचमस्तृतीयेऽर्थ एव प्रपंचितः। यदा पश्यः पश्यते रुक्मवर्णं॥ क
र्त्तारमीशं पुरुषं ब्रह्मयोनिं इति कुंठतत्त्वेनात्मपुरुषपरत्वमाह चतुर्थेनात्मपुरु
षस्तेनार्हणीयं तत्प्रतिपाद्य कुत्रेति विवक्षायामंतःशरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यंति यतयः क्षीणदोषा इति विशेषितं योगेश्चर्चनीया विभूतीर्निरूप्य यजनीय
स्यापरवस्तुनोऽयागस्यत्वमपि विश्वस्य त्राय रनरवियतीसन्न विवहितं दहरमे
व परदर्शनं। अयमेवार्थः। पुनः येनाक्रमंत्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य पर
मं निधानं। बृहच्च तद्दिव्यमचिंत्यरूपमित्यादिने शंपुरुषं ब्रह्मेति प्रतिपाद्य प।
श्यत्स्विहैव निहितं गुहायामिति प्रबोधाततस्तु तं पश्यति निष्कलं ध्यायमान

इतिध्यानमुक्त्वाएषोणुरात्माचेतसावेदितव्यो।यस्मिन्प्राणःपंचधासंविवेश।
प्राणैश्चित्तंसर्वमोतंप्रजानांयस्मिन्विशुद्धेविभवत्येषआत्मेतिनत्वणुत्वम
हार्थानुमवात्मनःप्रसज्युरवतयाप्राणानांवृत्तिरूपमिहविवक्षितंयज्ञनेम
वनिरूप्यतस्मादात्मज्ञंह्यर्चयेद्भूतिकामइतिदीक्षितादिमिहान्योवाराधनम
पिमदन्तर्यनिनुपूज्यपूजादिविनायोगेनयज्ञनंवहिरंगत्वात्स्वयमेवाघातहेतुर २५२
थवेत्तापुरुषयोर्भिन्नोह्यपरमात्मिवदृसादिज्ञंकामयतेवेदैतत्परमंब्रह्मधामत्र
यत्रविश्वंनिहितंभातिशुभ्रं।उपासतेपुरुषंयेह्यकामास्तेशुक्रमेतदतिवर्त्तं
तिधीराइत्यादिनिगमनेनपरमंशिवपरंतत्त्वमेवगच्छन्तीत्युक्तोतिपोज्ञोतिरिति

स्वंज्ञोतिहेनसर्वंप्रतिज्ञातःप्रतिपादितः।एवंवक्ष्यमाणपुरुषपदस्यापिसाम
मर्थ्यैःसंगतानवतीत्यर्थः।अतएवाह।सत्यमेकमिति।तथाचाथर्वणश्रुतिः
।हंहोहंसःसोहमिति।केवल्योपनिषदपि।कृतंसत्यंब्रह्मेति।एकं।अत्राथर्व
णश्रुतिः।अथकस्मादुच्यतेएकोयःसर्वान्संमन्यसंजन्हणोनाजःसंसृजति
विसृजतिचतीर्थमेकेतद्दक्षिणाःप्रसंचयुदंचःप्रत्यंचोत्रजंसकेतेषांसर्वेषा
मेवसंगतिःसाक्षंसएकोयज्ञतिष्ठतिप्रजानन्तस्मादुच्यतेएकइति।शिवए
कोध्येयःशिवंकरःसर्वमन्यत्परित्यज्यसमाप्ताथर्वशिखेतीतिच।अत्रहेतुग
र्भविशेषणमंसंबोधयति।सच्चिदानंदमूर्ति।सदेवसौम्येदमग्रआसीदितानि

संविज्ञानमानंदं ब्रह्मेति च श्रुतिरीशा सच्चिदानंदरूपा मूर्त्तिरपि ममेत्युक्ता।तत्र परं
ब्रह्म चरणद्वयमित्यर्थः।व्याप्तिस्थानमितियावत्।शुक्लमित्यर्थः।पूर्वोक्तमिश्रारक्त
सितबिंदुत्रितये शुक्लबिंदोरेव परशिवव्याप्तिपरत्वात्।तथा चाथर्वणशिरः
श्रुतिः।अथ कस्मादुच्यते शुक्लं यस्मादुच्चार्यमाण एव स्कंदयते क्लामयति तस्मा
दुच्यते शुक्लमिति।जयति सर्वोत्कृष्टः।तदेतत्तृतीयं स्थानमिति श्रुतिप्रसिद्धमि १५३
त्यर्थः।अत्रात्मातमस्कृतौन्नाकेरगावाञ्नावार्थः।तथा च महामन्त्रे त्यर्थः।तदुक्तं
पुराणे नंदनमुनींद्रैः।सितशोणबिंदुयुगलं विविक्तशिवशक्तिसंकुचत्प्रसरमिति
।कूर्मपुराणे।अहं हि भगवानीशः स्वयंज्योतिः सनातनः।परमात्मा परं ब्रह्म म

त्तोऽन्यन्न विद्यत इति।एनमेके वदंत्यग्निं नारायणमथापरे।इंद्रमेके परे
प्राणं ब्रह्माणमपरे जगुः।ब्रह्मविष्ण्वग्निवरुणाः सर्वे देवास्तथर्षयः।एक
स्यैवाथ रुद्रस्य भेदास्ते परिकीर्तिता इति च शिवपुराणेपि।सृष्टेः प्रवर्तको ब्रह्मा
स्थितेर्विष्णुर्विमोहकः।संहारस्य तथा रुद्रस्तयोर्नित्यं नियामकः।तस्मात्त्रयस्ते १५५
कथ्यंते जगतः कारणत्रयं।कारणत्रयहेतुश्च शिवः परमकारणमिति।स्कांदेपि।
ब्रह्मा विष्णुश्च रुद्रश्च परतत्वविभूतयः।एषां त्रयाणामधिकः सर्वकारणमीश्व मे
रेति।योगवासिष्ठेपि।ब्रह्मार्कविष्णुहरशक्रसदाशिवादिश्रांतौ शिवं परममेतदि
हैकमास्ते।सर्वोपाधिमयस्तादृग्विविक्तरूपं चैतन्यमात्रमयमुज्झितविश्वसंग

मिति॥ अग्निरग्रे प्रथमो देवतानां इंद्रो यातो वसितस्य राजा विश्वस्मादिंद्र उत्तर इत्या
दिरितरपरिच्छिन्नैश्वर्यविकल्प एव श्रुतिगतः। परिच्छिन्नमैश्वर्यं वक्तीति ना
वः। अत्रैतरेयश्रुतिः। एष ब्रह्मैष इंद्र एषः प्रजापतिरेते सर्वे देवा इमानि पंच
महाभूतानीत्यादिरूपसंकृतो निरुक्तसंज्ञात्मपरैवाप्य हाहमनुरूपसंकृतो। प्र
शासितारं सर्वेषामणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं प १५४
रं॥ इति सर्वान्तर्यामितयाभिरूप्य। एवमेके वदंत्यग्निं मरुतोऽन्ये प्रजापतिं इंद्र
मेके परे प्राणमपरे ब्रह्म शाश्वतमिति वैदिकव्यवहारं प्रदर्श्य। एष सर्वाणि भू
तानि पंचभिर्व्याप्य मूर्तिभिः। जन्मवृद्धिक्षयैर्नित्यं संसरति चक्रवदिति। अनं

कृतिस्तु समर्थनीया॥ यस्य ब्रह्मादीनामतत्त्वस्य संज्ञोतिहृद्रिना समर्थनं रूपं काय
लिंगं। स्वज्ञोतिरादीनां विशेषणानां सानिप्रायतया परिकरोति। मच्छिद्रानंदमूर्ति
परार्थहेतुकमपि तेन परत्वसमर्थनात्। विभूतियोगे विभूतित्वेनैषां विवक्षित
त्वान्निषेधामास। आह्वेयोपि गम्यः। अन्यत्र लक्षणं वक्ष्यते॥२८॥ ननु तत्तत्सिद्धांतप्रति
पाद्यानि रूपाणि मितत्वान्निश्चयं तेकथमेकमेव परं सर्वान्तरूपं त्वया वधारितमित्या
शंक्याह॥ त्रीणि संख्यांतिकार्येत्वमिति। विभिन्नवर्त्मकरवर्गवतः प्रमाणानि मां संतेन
वंतवक्रमतज्जनकैराहता श्रुत्यविद्येः। अस्मोसमस्पर्द्धिनः तिकथमिहन्वत्
स्तत्वमीषुः स्वतेजः सर्वातीतं विकल्पग्रहरहितमनेमानतर्काद्यगम्यं॥ हे दं

ऽइति। ज्ञां शुरुकलक्षणः। स्वमिति विनवतो खर्वगर्व इति। आत्मीयामतिस्त्वम्।
विनवतो विनृत्ता हेतुना इत्यर्थः। खर्वः स्वल्पो गर्वोऽभिमानो येषां तथान मुक्तस्यो।
क्ता। खर्वीकृतस्वश्च वामन इति कोशः। मनीषा कौ सपद्मो चुराईकाराननुतत्वजि
ज्ञासव इति नाव। येसे द्वांतिका इति। सिद्धांतः सन्मतोपद्रलक्षणः प्रयोजनमेषां
ननु तात्विकी जिज्ञासेति मुमुक्षा प्रयोजनमित्यधिकारे प्रागवत्ते विद्यमुक्ताः। आ १५५
वृताश्शुद्धविद्येरिति। आवृतां तरोडीकृता शुद्धविद्या शुद्धवेदनं तात्विको नुभव
इत्यर्थः। सा न भवत्यशुद्धविद्यायेस्त्वयोक्ते। बकुमतजनकैरिति। अत एव बकु
नां मतानां तत्वदृश्नानां जनकैः शंकरैरित्यर्थः। प्रमाणं। यच्च मुंडकोपनिषदि।

न तत्र सूर्यो भाति न चंद्रतारकमित्याद्युक्तं तत्र किं तेजः। ब्राह्मणां साहचर्यात्तेजा
त्मकं तेजोंतरमुत तच्चैतन्यमिति। आरंभाधिकरणे कार्यकारणयोरनन्यत्वप्रतिपा
दने परिणामो भ्युपेयः। स च कात्स्न्येनांशेन वा। एवं च मायिकं शरीरसंबंधो न वे
तिमित्यंतयुक्तो न वेति। वैषम्याप्रसक्तिर्जगतः सुखदुःखादिमिसृष्टौ नवेति। ए
वं च पूर्वोक्तविश्वहेतुप्रतिपादकप्रमाणेष्वपि हेतुत्वेवा यथा सदेव सौम्येदमग्र
आसीदेकमेवाद्वितीयं तस्माद्वैक आहुरसदेवेदमग्र आसीदेकमेवाद्विती
यं तस्मादसतः सज्जायतेति कुतस्तु खलु सौम्यैवं स्यादिति होवाच कथमसतः स
ज्जायतेति कुतीतसल्वेदेव सौम्येदमग्र आसीदित्यादिषु स्वत एव विप्रतिपत्तौ सद

स्वेसाद्दि। प्रधानं परमाणवो वा कारणानि प्रभुः। कदाचिद्रजोबलो ब्रह्मा कदाचित्सत्त्व
पः स्वार्थ इत्यादि रूपैः श्रुतिस्मृतिवाक्यैरित्यर्थः। नवं नमिति। नातेऽर्वतुः। स्वरसिम
चक्रप्रोतसकलविश्वरूपतया प्रसंगबहिष्कृतां न मित्यर्थः। तथा चैवं प्रसत्त्वम
पित्वां तेन पत्रयंती साह। मीमांसते। विचारणान्मा रुधा तो मन्त्रिधहानूखानून्मो
हीर्घ इति सनं तात्कारिलट् विचारयंति। ननु ते ते न सविश्रांतिं त्वनं ते इत्सर्थः॥ १५६
अविश्रांतो हेतुमाह। अमी मेति। यस्मात्तेऽमी नं परस्परं। कर्मकातिहारे सर्वना
म्नो द्वेस्त इति रुक्तिः। समासवद्भ बहुवचनाद् समासपक्षे प्रथमैकवचनं। सधि
नः। स्पर्द्धनशीला। ताछील्ये णिनिः। यतस्तेषद्यु नेना कात्रा तः सृष्टिः प्रपंचितातन्म

या वा पो वस्मि स्मोपि। प्रधानपरमाणुकारणत्वेनापि वा यथा कथाचिद्गुणास्त्वा
भिमानवशाः स्वसिद्धांतपक्षपातांधाः परस्परं विवदमाना इत्यर्थः। भवतो निरु
क्तलक्षणतत्त्वस्वरूपं इति यावत्। यथा यथा तु न वमिसर्थः। तत्कथमित्यत्र हेतुः। इत्त
संसारेऽनेनैरवा। एते लिट्। आत्मनेपदप्रथमपुरुषबहुवचनं। न कथमपी
सर्थः। तदुक्तं च श्रीघमुनिना ण व पुंदरी महिम्नस्तुतौ। सिद्धांतैर्बहुभिः प्रमाणगु
णोत्तैरमैरविद्यातमोनकृत्तैरिव सर्व मंथतमतं नानावन्निर्मिद्यते। यावत्तेसवि
तेव मन्यतमिदं नो देति विश्वांतरे जंतोर्जन्मविमोचनैकविश्राद्ध श्रीत्वांम विश्री
त्रिवे इति। अत्र हेतुमाह। यतस्तत्त्वं। स्वतेज इति। स्वतेजसैः माते हाणा पा

नित्य ज्ञधातो हरणोनिष्पन्नं तेजस्तेन सर्ववस्तुसमाणं येषां प्रपंचेभ्रमतीतं। यद्वा स्वतेजः
स्वप्रकाशं सर्ववर्तीतं वाङ्मनोविषयत्वात्। कोर्थः। वस्तुसमाणाद्दृष्टिभ्यादृष्टि यदुन्नयपी
वेत्राब्रह्मादिभ्रितयट्टून्मित्वा महत्सदयेधाम्निस्थितमिति। सिद्धांताभ्र ब्रह्मादिविष
याइति भावः। ते च तद्ग्रहणादृ इति सुतरां स्वसंविद्रूप्यमतत्वानुपपत्तिरिति ता
त्पर्यं। यतो तदुक्तं। अतीतं तु परं तेजः स्वसंविद्रूपमात्मकमिति। यतो वाचो निव १४३
र्तंते अप्राप्य मनसा सहेति श्रुतिरीसा वाङ्मनोः विषयं। ये तु वाङ्मनोविषया इति भा
वः। अतएव विकल्पग्रहरहितं। विकल्पः पूर्वोक्तः कोटिद्वयावलंबी। अतिरात्रे षो
डशी ग्रहणएव तो ग्रहः गृह्यते वा गृह्यते ऽनेनेति व्युत्पत्त्या ग्रहश्चाग्रहश्चावस्त्ना

णामानन्तर्याद्यनुगुणोऽनुमितिसाधनीभूतो वैशेषिकाद्यभिप्रेतो ग्रहस्तांस्तां।
अपवा जसनेयिनां श्रुतौ कतिग्रहाः कति अग्रहा इति जारत्कारवार्तभागप्रश्नेत्र
ष्टौ ग्रहा अष्टावति ग्रहा इति याज्ञवल्क्योक्तास्तैः प्राणापानादिभिः रहितं। यतः
संदिग्धे द्विवस्तुनि प्रमाणान्तरमापेक्षते विकल्पस्तवाग्रहस्यावकाशः। एवं कु
तः यतः अजं न जायत इति व्युत्पत्त्या सम्बादिशून्यं। तदुक्तं योगवासिष्ठे। सर्वहा
सर्वकृत्सर्वः सर्वात्मायं महेश्वरः। आत्मेन स्तमितो भास्वान् जोदेवो निरामय
इति। अतः मान तर्काद्यगम्यं। मानानि मीयंते मीयंते एभिरिति वा व्युत्पत्त्या प्रमा
तन्यकरणानि वा प्रत्यक्षादीनि तदुक्तमभियुक्तैः। तत्र प्रमाणं प्रमयाव्याप्तं

प्रमितिसाधनं। प्रमाश्रयो वा तद्व्यासो यथार्थानुभवः प्रमा। नित्यानित्यतमाद्द्विधा प्र
मा नित्यप्रमाश्रयः प्रमाणमितरस्यास्तु कारणस्य प्रमाणत्वं। अविसंवादिविज्ञा
नं प्रमाणमिति सौगताः। अनुभूतिः प्रमाणं मा स्मृतेरमेति केचन। अज्ञानच
रितार्थनिश्चायकमप्यपरे। प्रमेयव्याप्यमपरे प्रमाणमिति स्मिमन्ते। प्रमानि
यतसामग्रीं प्रमाणं केचिदूचिरे। प्रत्यक्षमनुमानाख्यमुपमानं तथागमः। प्र २५८
माणं प्रविधमेवमक्षपादेन कल्पितं। प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः। अ
नुमानं च तच्चापि सांख्याः शाब्दं च ते अपि। न्यायैकदेशिनोप्येवमुपमानं च केच
नाऽर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः। अभावषष्ठानि तानि भाट्टा वेदां

तिनस्तथा। संभवैतिह्ययुक्तानि तानि पौराणिका जगुः। आचारस्मृतिलिंगानि चाले
ह्नतिविरोधविदुरिति। तर्काः शुक्रपूर्वाः संशयभेदाः। आदिशब्दादुपाधयो हेत्वा
भासाश्चोक्तलक्षणास्तेषामगम्यमविषयः। अप्रविविक्तो षण्णां नामापेक्षत्वेन वा।
कांतरत्वान्न समासपुनरुक्तदोषः। अलंकृतिस्तु। पूर्वार्धे स्वभावोक्तिः। तथा च
तल्लक्षणं सूत्रं। सूक्ष्मवस्तुस्वभावयथावद्वस्तुवर्णनं स्वभावोक्तिरिति। सर्व
पदार्थस्य सर्वातीतत्वाद्युत्तरवाक्यार्थस्य तत्त्वाज्ञाने प्रतिहेतुत्वात्काव्यलिंगं। म
वतीत्वादीनां नुत्तरमुत्तरं प्रतिहेतुत्वेन गुंफात् कारणमालापीति कश्चमीपुरि
सत्रनकथमपी सप्रस्तुतार्थज्ञानाद प्रस्तुतप्रशंसापि लक्षणं वक्ष्यते॥१७॥
